नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 20

No. of Printed Pages — 3

# VU—94–Sans. Vangmay

## वरिष्ठ उपाध्याय परीक्षा, 2015

**संस्कृत वाङ्मय** ( अनिवार्यः )

समय : $3\frac{1}{4}$ घण्टे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्काः अनिवार्यतः लेख्याः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीयाः ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. अभिनवबाणपदेन आधुनिकाः समीक्षकाः कं रचनाकारं सम्बोधयन्ति ? 1
2. दिल्लीश्वरः कं यवनवीरं प्रेष्य पुण्यनगरं शिववीरहस्ताद् आचिच्छिदे ? 1
3. आम्रवनवियोगस्य ज्वालाभिः कः ज्वलति ? 1
4. 'श्रीचित्रकूटगुणमालिका' इति कस्य काव्यस्य अपरं नाम वर्तते ? 1
5. अनेकमखधूमवितानपूता जगति ख्याता च का पुरी आसीत् ? 1
6. प्रधाननगरद्वारं 'रामगोपाल' इत्याख्यं स्वनगरी-ललना-ललाटे केन संस्थापितम् ? 1
7. चित्राङ्गदः कस्य दुर्गस्य निर्माणमकरोत् ? 1
8. ''ऋहलोर्ण्यत्'' इति सूत्रस्य सोदाहरणमर्थो लेख्यः । 2
9. ''गोस्त्रियोरुपसर्जनस्य'' इति सूत्रस्य व्याख्या कार्या । 3
10. शिवराजविजयस्य काव्यसौष्ठवं स्पष्टय्यत । 3
11. वीरभूमिकाव्यस्य भाषाशैलीं स्पष्टयत । 3
12. अधोलिखितयो**रेकस्य** श्लोकस्य सप्रसंग व्याख्या विधेया — 4

(क) आलोकिता वसुमती सकलापि किन्तु ,
नालोकितः सुरुचिरो यदि मेदपाटः ।
क्लिष्टं मुधा, सफलता तु विलोचनस्य,
श्रीमेदपाट वसुधासुषमाऽवलोकात् ॥

(ख) अत्रैव कोकिलविनिन्दिमनोज्ञकण्ठी,
श्रीकुम्भकर्ण नृपतेस्तनया रमापि ।
उत्सन्नतामुपगतां स्वपितुः प्रवृत्ताम् ,
सङ्गीतशास्त्रसरणिं पुनरुद्धार ॥

13. अधोलिखितयो**रेकस्य** श्लोकस्य सप्रसङ्ग-भावार्थो लेख्यः — 4

(क) अत्रैव मोकलधराधिपतेः प्रपौत्रो,
व्याघ्रो बहादुर-चमूप-मृगान्निहत्य ।
दत्त्वाऽरिमूर्धसु पदं दिवमारुरोह,
प्रोद्गीयमान चरितः सुरसुन्दरीभिः ॥

(ख) दृष्टिं निधेहि सुविशालतरे गभीरे,
वापीयुगे दृढ़शिलाघटितान्तरङ्गे ।
तैलं घृतं च परिपूरितमत्र नूनम् ,
श्रीमोकलेन्द्रजगतीशसुता विवाहे ॥

14. अधोलिखितेषु **पञ्चवाक्यानां** संस्कृतभाषायामनुवादो विधेयः — $5 \times 1 = 5$

(i) ग्राम के चारों ओर पर्वत हैं ।
(ii) कृष्ण के साथ बलराम जाएगा ।
(iii) छात्र आसन से गिरता है ।
(iv) प्राकृतिक सौन्दर्य किसे अच्छा नहीं लगता है ।
(v) राम और मोहन घर गये ।
(vi) इस समय राष्ट्र में स्वच्छता का कार्यक्रम चल रहा है ।
(vii) भाषाओं में संस्कृत भाषा श्रेष्ठ है ।
(viii) आचरण ही परम धर्म है ।

15. अधोलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य 200 शब्देषु निबन्धं लिखत — 5

(i) संस्कृतिः संस्कृताश्रया

(ii) सत्सङ्गतिः

(iii) मम प्रियः कविः

(iv) स्त्रीशिक्षायाः महत्त्वम् ।

16. निम्नलिखितेषु **पञ्चपदानां** संघटनां विधाय वाक्येष्वपि प्रयोगं कुरुत — 5 × 1 = 5

(i) स्तु + क्यप्

(ii) छिद् + क्तः

(iii) पू + इत्र

(iv) अर्थमर्थं प्रति

(v) राज्ञः पुरुषः

(vi) न ब्राह्मणः

(vii) उपगोरपत्यम्

(viii) पितुर्भ्राता ।

17. निम्नाङ्कितेषु गद्यांशेषु कयोश्चिद् **द्वयोः** सप्रसंग व्याख्या विधेया — $2 \times 4\frac{1}{2} = 9$

(क) तं च विवर्ण-वदनम् , आजानु-धूलि-धूसरित-चरण-युगलम् , मन्थरितशरीरम् स्वेद-क्लिन्नं चावलोक्य, ''दूरतः कश्चन समायातोऽस्ति, तद्भृत्य एवायम्'' इति निश्चित्य शनैरप्राक्षीत् - ''कस्यायमश्वः ?'' इति । स तु स्वकार्य-संलग्नोऽन्यमनस्क एव ''समायातः कोऽपि इत्युद रत् ।'' पुनरपि ''कुत आगता यूयम् ?'' इति पृच्छति शिववीरः ।

(ख) निर्दिष्टस्थाने उपविश्य च, स एवायं पूर्वदृष्टो वीर इति निरीक्ष्य ''अहो ! वीरो वीरो वीरः । वीरमेवान्विष्यन् दिल्लीत इतो यावत् समायातोऽस्मि, वीरमेव च प्राप्तवानस्मि । विजयतां धर्मोद्धारण-धीरः, सपत्नोत्सारण-समीरः, वीरो महाराज'' इत्युदीर्य किञ्चित् स्मयमानस्य महाराजस्य मुखमवलोकयन् तत्प्रशंसायां वीररसमयीं कवितामेकामपठत् ।

(ग) यावदारभ्य चिक्कनदुर्गोऽस्माभिः गृहीतस्तावदारभ्य महाराष्ट्र-बालकोऽप्यस्मान् चिचर्वयिषुरिव सभ्रुकुटि पश्यति न त्वधीन इति बिभेति । पर्वत-प्रायस्य कोङ्कणदेशस्य केशरिण एते । को जानीते कदाऽऽक्रम्यास्मान् कर्तयित्वा क्रव्यादेभ्यो विकिरिष्यन्ति, परन्तु कृतघ्ना एते मिथ्या-प्रलापैरेव चमूपतिं वञ्चयन्ति' इत्यालपत् ।

(घ) अथ ''गच्छ, यत्र शिवोऽधुना वसति तस्मिन्नपि वयमद्य श्वो वा एवमेव विचरिष्यामः । किमिव गतं शोचसि ? तद्रक्षार्थमेव यतनीयमिति प्रभवे निवेदय'' इति प्रौढं भाषमाणे रक्षके अङ्गारप्रतिमाभ्यां चक्षुर्भ्यां तं दहन्निव, आपादमामस्तकं च द्विस्त्रिरवलोक्य यदाज्ञाप्यते वीरैः इति सव्यङ्ग्यमाभाष्य घण्टापथेन यातायातं कुर्वतां मनुष्याणां प्रवाहे मिश्रितो बभूव ।

18. लभ्यम् , देयम् , जनार्दनः, सरसिजम् , पक्वः, रागः, चयः, स्मारं-स्मारम् एषु पञ्च प्रयोगाः साधनीयाः । 5 × 2 = 10

19. भूतपूर्वः, सहरि, हरित्रातः, पञ्चगवम् , सुपुरुषः, चित्रगुः, पाणिपादम् , गवाक्षः एषु पञ्च प्रयोगाः साधनीयाः । 5 × 2 = 10

20. दैत्यः, दाक्षायणः, आधिदैविकम् , शाब्दिकः, नाव्यम् , गोत्वम् , कुत्र, लघिष्ठः एषु पञ्च प्रयोगाः साधनीयाः । 5 × 2 = 10